# चतुर्थः पाठः

# प्रबुद्धो ग्रामीणः

## (बुद्धिमान् ग्रामीण)

एकदा बहवः जनाः धूमयानम् (रेल) आरुह्य नगरं प्रति गच्छन्ति स्म। तेषु केचित् ग्रामीणाः केचिच्च नागरिकाः आसन्। मौनं स्थितेषु तेषु एकः नागरिकः ग्रामीणान् उपहसन् अकथयत् "ग्रामीणाः अद्यापि पूर्ववत् अशिक्षिताः अज्ञाश्च सन्ति। न तेषां विकासः अभवत् न च भवितुं शक्नोति।" तस्य तादृशं जल्पनं श्रुत्वा कोऽपि चतुरः ग्रामीणः अब्रवीत्, "भद्र नागरिक! भवान् एव किञ्चित् ब्रवीतु यतो हि भवान् शिक्षितः बहुज्ञः च अस्ति।" इदम् आकर्ण्य स नागरिकः सदर्पं ग्रीवाम् उन्नमय्य अकथयत्, "कथयिष्यामि, परं पूर्वं समयः विधातव्यः।" तस्य तां वार्त्तां श्रुत्वा स चतुरः ग्रामीण अकथयत्, "भोः वयम् अशिक्षिताः भवान् च शिक्षितः, वयम् अल्पज्ञा भवान् च बहुज्ञः, इत्येवं विज्ञाय अस्माभिः समयः कर्त्तव्यः, वयं परस्परं प्रहेलिकां प्रक्ष्यामः। यदि भवान् उत्तरं दातुं समर्थः न भविष्यति तदा भवान् दशरूप्यकाणि दास्यति। यदि वयम् उत्तरं दातुं समर्थाः न भविष्यामः तदा दशरूप्यकाणाम् अर्धं पञ्चरूप्यकाणि दास्यामः।"

"आं, स्वीकृतः समयः", इति कथिते तस्मिन् नागरिके स ग्रामीणः नागरिकम् अवदत्, "प्रथमं भवान् एव पृच्छतु।" नागरिकश्च तं ग्रामीणम् अकथयत्, "त्वमेव प्रथमं पृच्छ" इति। इदं श्रुत्वा स ग्रामीणः अवदत् "युक्तम्, अहमेव प्रथमं पृच्छामि।"

**अपदो दूरगामी च साक्षरो न च पण्डितः।**
**अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥**

अस्या उत्तरं ब्रवीतु भवान्।

नागरिकः बहुकालं यावत् अचिन्तयत्, परं प्रहेलिकायाः उत्तर दातुं समर्थः न अभवत्, अतः ग्रामीणम् अवदत्, अहम् अस्याः प्रहेलिकायाः उत्तरं न जानामि। इदं श्रुत्वा ग्रामीणः अकथयत्, यदि भवान् उत्तरं न जानाति, तर्हि ददातु दशरूप्यकाणि। अतः म्लानमुखेन नागरिकेण समयानुसारं दशरूप्यकाणि दत्तानि।

पुनः ग्रामीणोऽब्रवीत्, "इदानीं भवान् पृच्छतु प्रहेलिकाम्।" दण्डदानेन खिन्नः नागरिकः बहुकालं विचार्य न काञ्चित् प्रहेलिकाम् अस्मरत्, अतः अधिकं लज्जमानः अब्रवीत्, "स्वकीयायाः प्रहेलिकायाः त्वमेव उत्तरं ब्रूहि।" तदा स ग्रामीणः विहस्य स्वप्रहेलिकायाः सम्यक् उत्तरम् अवदत् 'पत्रम्' इति यतो हि इदं पदेन विनापि दूरं याति, अक्षरैः युक्तमपि न पण्डितः भवति। एतस्मिन्नेव काले तस्य ग्रामीणस्य ग्रामः आगतः। स विहसन् रेलयानात् अवतीर्य स्वग्रामं प्रति अचलत्। नागरिकः लज्जितः भूत्वा पूर्ववत् तूष्णीम् अतिष्ठत्। सर्वे यात्रिणः वाचालं तं नागरिकं दृष्ट्वा अहसन्। तदा स नागरिकः अन्वभवत् यत् ज्ञानं सर्वत्र सम्भवति। ग्रामीणाः अपि कदाचित् नागरिकेभ्यः प्रबुद्धतराः भवन्ति।

# ॥ अभ्यास प्रश्न ॥

## ➡ लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए :**

1. धूमयानमारुह्य के गच्छन्ति स्म?
2. ग्रामीणान् कः उपाहसत्? **(2016CD, 20MA)**
3. 'कथयिष्यामि, परं पूर्वं समयः विधातव्य' इति केन उक्तम्?
4. प्रथमं प्रश्नं कः अपृच्छत्? **(2017AD)**

**अथवा** ग्रामीणः नागरिकम् किम् अपृच्छत्?

5. कः कम् अवदत् यत् "अहम् अस्याः प्रहेलिकायाः उत्तरं न जानामि" इति?
6. प्रहेलिका का आसीत्?
7. 'ज्ञानं सर्वत्र सम्भवति' इति कः अन्वभवत्?
8. नागरिकः किमर्थं लज्जितः अभवत्?
9. नागरिकः ग्रामीणान् किम् अकथयत्?
10. पदेन विना किं दूरं याति? **(2016CC,17AC,AF,20MG)**
11. अन्ते नागरिकः किम् अनुभवम् अकरोत्?
12. ग्रामीणस्य प्रहेलिकायाः किम् उत्तरम् आसीत्? **(2018HA)**
13. नागरिकः किम् अर्थेन खिन्नः अभवत्?
14. नागरिकः किं दातुं समर्थः न अभवत्?
15. अमुखोऽपि कः स्फुटवक्ता भवति?
16. ज्ञानं कुत्र सम्भवति? **(2016CA,CE,17AG,19AC,20MB,MF)**
17. धूमयाने समयः केन जितः?

## ➡ अनुवादात्मक प्रश्न

**1. निम्नलिखित संस्कृत-गद्यांशों का ससन्दर्भ हिन्दी में अनुवाद कीजिए—**

(क) एकदा बहवः ……………………विधातव्यः।

**अथवा**

एकदा बहवः ……………भवितुं शक्नोति। **(2020MC)**

**अथवा**

एकदा बहवः जनाः ……………… शिक्षितः बहुज्ञश्च अस्ति। **(2017AA)**

(ख) इदम् आकर्ण्य …………………… दास्यामः।

**अथवा**

तस्य तां वार्तां ………………… दास्यामः।

(ग) आम्, स्वीकृतः……………ब्रवीतु भवान्।

**अथवा**

आम् स्वीकृतः समयः ………………अहमेव प्रथमं पृच्छामि। **(2020MG)**

अपदो दूरगामी……………… स पण्डितः। **(2017AF)**

(घ) नागरिकः बहुकालं………………… दत्तानि। **(2017AE,AG,20MA)**

(ङ) पुनः ग्रामीणोऽब्रवीत्…………………अचलत्।

**अथवा**

तदा स ग्रामीणः ………… तूष्णीम् अतिष्ठत्।

**अथवा**

दण्डदानेन खिन्नः …………न पण्डितः भवति।

(च) एतस्मिन्नेव…………………प्रबुद्धतराः भवन्ति।

(छ) तदा स ग्रामीणः……………प्रबुद्धतराः भवन्ति।

(ज) यतो हि इदं……………………दृष्ट्वा अहसन्।

**2. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(क) ग्रामीण आज भी अशिक्षित हैं।

(ख) ऐसा सुनकर वृद्ध बोला।

(ग) आप दस रुपये देंगे।

(घ) मैं इस पहेली का उत्तर नहीं जानता हूँ।

(ङ) क्या आप उत्तर दे सकते हैं?

(च) अब आप प्रश्न पूछिये।

(छ) ग्रामीण चतुर नहीं होते हैं।

## ➠ व्याकरणात्मक प्रश्न

(1) अद्यापि, अन्वभवत्, इत्येवं में सन्धि-विच्छेद कर सन्धि का नाम लिखें।

(2) निम्न धातुओं में 'तव्य' प्रत्यय लगाकर शब्द बनाइए—
गम्, कृ, मन, दृश्, पठ्, स्था।

(3) निम्नलिखित शब्दों के तृतीया एवं सप्तमी विभक्ति के रूप लिखिए—
अस्मद्, तद्।

## शब्दार्थ

**धूमयानम्** = रेलगाड़ी। **आरुह्य** = सवार होकर। **मौनं स्थितेषु तेषु** = उन लोगों के मौन रहने पर। **अद्यापि** = आज भी। **आम्** = हाँ। **विज्ञाय** = जानकर। **कथिते तस्मिन् नागरिके** = उस नागरिक के कहने पर। **एतस्मिन्नेव काले** = इसी समय में ही। **विहसन्** = मुस्कराकर। **अवतीर्य** = उतरकर। **तूष्णीम्** = चुप। **भोः** = अरे। **धूमयानम् (रेल)** = लौहपथगामिनी। **दर्प** = घमण्ड, अहंकार। **वाचालं** = बड़बोला, अधिक बोलनेवाला। **अज्ञाः** = मूर्ख। **जल्पनम्** = कथन। **आकर्ण्य** = सुनकर। **उन्नमय्य** = उठाकर। **समयः** = शर्त। **विधातव्यः** = बदलना चाहिए। **अल्पज्ञाः** = कम जानने वाले। **बहुज्ञः** = बहुत जानने वाला। **कर्तव्यः** = लगानी चाहिए। **प्रहेलिकाम्** = पहेली को। **आपदः** = बिना पैरों का। **साक्षरः** = अक्षरयुक्त। **अमुखः** = बिना मुख का, मुखविहीन। **स्फुटवक्ता** = स्पष्ट बोलने वाला। **विचार्य** = विचार करके, सोच-समझकर। **लज्जमानः** = लज्जित होता हुआ। **सम्यक्** = सही-सही। **याति** = जाता है। **विहस्य** = हँसकर। **अन्वभवत्** = अनुभव किया। **कदाचित** = कभी। **प्रबुद्धतराः** = अधिक बुद्धिमान।

●●